CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 305

Title Kaivalyopaniṣad.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 305 Subject: Vedic lit.

Title: Kaivalyopaniṣad.

Author: Mādhavānand. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 7.5" by 3.3" Extent: 4 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

॥माधवानंदसरस्वत्याइदंपुस्तकं॥

अथकैवल्योप॰ ॥ ॐ ॥ अथाश्वलायनो भगवंतं परमेष्ठिनं परि
समेत्योवाच ॥ अधीहि भगवन्ब्रह्मविद्यां वरिष्ठां सदा सद्भिः
सेव्यमानां निगूढां ययाचिरात्सर्वपापं व्यपोह्य परात्परं पुरु
षं याति विद्वांस्तस्मै स होवाच पितामहश्च श्रद्धा भक्ति ध्या
नयोगादवैहि ॥ न कर्मणा न प्रजया धनेन त्यागेनैके अ
मृतत्वमानशुः ॥ परेण नाकं निहितं गुहायां विभ्राजते
यद्यतयो विशंति ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्या
सयोगाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोकेषु परांतका
ले परामृतात्परिमुच्यंति सर्वे ॥ विविक्तदेशे च सुखासन

स्थः शुचिः समग्रीवशिरः शरीरः ॥ अत्याश्रमस्थः सकलेंद्रिया
णि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुंडरीकं विरजं वि
शुद्धं विचिंत्य मध्ये विशदं विशोकं ॥ अचिंत्यमव्य
क्तमनंतरूपं शिवं प्रशांतममृतं ब्रह्मयोनिं ॥ तमादिमध्यां
तविहीनमेकं विभुं चिदानंदमरूपमद्भुतं ॥ उमासहायं
परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ॥ ध्यात्वा मु
निर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स
ब्रह्मा स शिवः सेंद्रः सोक्षरः परमः स्वराट् ॥ स एव विष्णुः
स प्राणः स कालोग्निः स चंद्रमाः ॥ स एव सर्वं यद्भूतं यच्च

नहमेव तद्वन्महानहं विश्वमहं विचित्रं। पुरातनोहं पुरुषोह
मीशो हिरण्मयोहं शिवरूपमस्मि॥ अपाणिपादोहमचिंत्यश
क्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः॥ अहं विजानामि वि
विक्तरूपो न चास्ति वेत्ता मम चित्सदाहं॥ वेदैरनेकैरहमेव
वेद्यो वेदांतकृद्वेदविदेव चाहं॥ न पुण्यपापे मम नास्ति ना
शो न जन्म देहेंद्रियबुद्धिनास्ति॥ न भूमिरापो मम वह्निरस्ति
न चानिलो मेस्ति न चांबरं च॥ एवं विदित्वा परमात्मरू
पं गुहाशयं निष्कलमद्वितीयं॥ समस्तसाक्षिं सदसद्विहीनं
प्रयाति शुद्धं परमात्मरूपं॥ यः शतरुद्रीयमधीते सोग्नि

पूतो भवति॥ सुरापानात्पूतो भवति॥ ब्रह्महत्यात्पूतो भव
ति। कृत्याकृत्यात्पूतो भवति। तस्मादविमुक्तमाश्रितो भवत्य
त्याश्रमी सर्वदा सकृद्वा जपेद् अनेन ज्ञानमाप्नोति संसारार्ण
व नाशनं तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते कै
वल्यं फलमश्नुत इति॥ इति कैवल्योपनिषत्॥ समाप्ता
श्री[illegible]डार्पणमस्तु॥